# শ্রীকৃষ্ণজয়ন্তী নির্ণয়ঃ

{॥ শ্রীকৃষ্ণজয়ন্তী নির্ণয়ঃ ॥}

শ্রী গুরুভ্যো নমঃ হরিঃ ওঁ

শ্রীমদানন্দতীর্থ ভগবৎপাদাচার্য বিরচিতঃ

শ্রীকৃষ্ণজয়ন্তী নির্ণয়ঃ

রোহিণ্যা মধ্যরাত্রে তু যদা কৃষ্ণাষ্টমী ভবেত্ ।

জয়ন্তী নাম সা প্রোক্তা সর্বপাপপ্রণাশনী(নং) ॥ ১॥

যস্যাং জাতো হরিঃ সাক্ষান্নি শেতে ভগবানজঃ ।

তস্মাত্তদ্দিনমত্যর্থং পুণ্যং পাপহরং শুভপরম্ ॥ ২॥

তস্মাৎসর্বৈর্রুপোশ্যা সা জয়ন্তী নাম সা(বৈ) সদা ।

দ্বিজাতিভির্বিশেষেণ তদ্ভক্তৈশ্চ বিশেষতঃ ॥ ৩॥

যো ভুঙ্ক্তে তদ্দিনে মোহা(লোভা)ত্ পূযশোণিতমত্তি সঃ ।

তস্মাদুপবাসেন্নিত্য(পুণ্য)ং তদ্দিনে(নং) শ্রদ্ধযান্বিতঃ ॥ ৪॥

কৃত্বা শৌচং যথা ন্যাযং স্নানং কুর্যাদতংদ্রিতঃ ।

প্রভাত কালে কুর্বীত যূগাযেত্যাদিমন্ত্রতঃ ॥ ৫॥

নিত্যাহ্নিকং প্রকুর্বীত ভগবন্তমনুস্মরন্ ।

মধ্যাহ্ন কালে চ পুমান্ সাযঙ্কালে ত্বতন্দ্রিতঃ ॥ ৬॥

স্নাযেত পূর্বমন্ত্রেণ বাসুদেবমনুস্মরন্ ।

ততঃ পূজাং প্রকুর্বেত বিধিবৎসুসমাহিতঃ ॥ ৭॥

যনাযেতি চ মন্ত্রেণ শ্রদ্ধাভক্তিযুতঃ পুমান্ ।

কৃষ্ণং চ বলভদ্রং চ বসুদেবং চ দেবকীম্ ॥ ৮॥

নন্দগোপং যশোদাঞ্চ সুভদ্রাং তত্র পূজযেত্ ।

(অর্ঘ্যং দত্বা সমভ্যচ্যার্ভ্যুধিতে শশিমণ্ডলে) ।

জাতঃ কংসবধার্তায ভূভারোত্তারণায চ ॥ ৯॥

কৌরবানাং বিনাশায দৈত্যানাং নিধনায চ ।

পাণ্ডবানাং হিতার্থায ধর্মসংস্থাপনায চ ॥ ১০।

গৃহাণর্ঘ্যং মযা দত্তং দেবক্যা সহিতো হরিঃ ।

অর্ঘ্যং দত্বাসমভ্যর্চ্যাভ্যুদিতে শশিমণ্ডলে ॥ ১১॥

ক্ষীরোদার্ণবসম্ভূত অত্রিনেত্র সমুদ্ভবঃ ।

গৃহাণর্ঘ্যং মযা দত্তং রোহিণ্যা সহিতঃ শশিম্ ॥ ১২॥

দত্বার্ঘ্যং মনুনানেন উপস্থায বিধুং বুধঃ ।

শশিনে চন্দ্রদেবায সোমদেবায ছেন্দবে ॥ ১৩॥

মৃগিণে শী(সি)ত বিম্বায লোকদীপায দীপিণে ।

(রোহিণীসক্তচিত্তায কন্যাদানপ্রদাযিনে)

শীতদীদিতিবিম্বায তারকাপতযে নমঃ ॥ ১৪॥

উপসম্হৃত্য তৎসর্বং ব্রহ্মচারী জিতেন্দ্রিযঃ ।

বিশ্বাযেতি চ মন্ত্রেণ ততঃ স্বাপং সমাচরেত্ ॥ ১৫॥

ততো নিত্যান্হি কং কৃত্বা শক্তিতো দীযতাং ধনম্ ।

সর্বাযেতি চ মন্ত্রেণ ততঃ পারণমাচরেত্ ।

ধর্মাযেতি ততঃ স্বস্থো মুচ্যতে সর্বকিল্বিষৈঃ ॥ ১৬॥

॥ ইতি শ্রীমদানন্দতীর্থ ভগবৎপাদাচার্য বিরচিতম্ ॥

॥ জযন্তী নির্ণযঃ সম্পূর্ণম্ ॥

ভারতীরমণমুখ্যপ্রাণান্তর্গত শ্রীকৃষ্ণার্পণমস্তু

Encoded and proofread by volunteers as info at dvaita.org

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Krishna Jayanthi Nirnaya Lyrics in Bengali PDF
% File name : krishna_jayanti.itx
% Location : doc_vishhnu
% Author : Srimad Ananda Tiirtha, also known as Sri Madhva
% Language : Sanskrit
% Subject : Procedure for deciding and observing : Lord Krishna's birthday.
% Transliterated by : Murthy Navarathna murthy at nstl.com
% Proofread by : Shrisha Rao shrao at dvaita.org
% Latest update : September 3, 1996
% Send corrections to : info@dvaita.org
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website